MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

Tārapada Bhaṭṭācārya's *Kathā Dvādaśa*: A Comprehensive Literary Study

तारापदभट्टाचार्यस्य 'कथा द्वादश' : एकं समग्रसाहित्यिकमध्ययनम्

Sourav Ghosh

Research Scholar, Dept. of Sanskrit,
Jadavpur University, Kolkata, West Bengal, India.
Name of Supervisor: Dr. Shiuli Basu, Professor & Head,
Dept. of Sanskrit, Jadavpur University, Kolkata

State Aided College Teacher, Dept. of Sanskrit,
Tehatta Sadananda Mahavidyalaya, Tehatta,
Purba Bardhaman, West Bengal, India.
Email: souravghosh768728@gmail.con
Page No: 58-65

Abstract: *This paper presents a comprehensive study of Kathā Dvādaśa, a collection of twelve Sanskrit stories by Tārapada Bhaṭṭācārya. It examines the major themes and literary features of the collection, with particular emphasis on humour, satire, human psychology, love, and human values. The study also explores the author's synthesis of traditional Sanskritic elements with modern social realities, along with his use of simple language and lively dialogue. The stories reveal social contradictions, moral decline, selfishness, and human weaknesses through humour and satire, while also highlighting compassion, sacrifice, and humanity. The paper demonstrates that Kathā Dvādaśa represents a significant contribution to modern Sanskrit short-story literature through its blend of social awareness, psychological insight, and literary artistry.*

Keywords: *Modern Sanskrit Short-Story, Social Criticism, Moral Values, Humour, Satire, Dialogue.*

कविपरिचितिः— तारापदभट्टाचार्यस्य संस्कृतकथासाहित्ये कीदृशं योगदानं तत्तु प्राक्तनाध्यापिकानाम् ऋताचट्टोपाध्यायमहाभागानां अनया उक्त्या बुध्यते— "संस्कृत छोटगल्पेर जगते तारापद् एकाइ एकशो"[1] इति। अर्थात् तारापदः एक एव शतानां समानः। श्रीतारापदभट्टाचार्यः वङ्गदेशस्य वर्तमान-बाङ्गलादेशान्तर्गतस्य ढाकाविक्रमपुर-परगणायाः निवासी आसीत्। संस्कृताध्ययने तस्य प्रतिभा बाल्यकालादेव परिलक्षिता। कलिकाता-विश्वविद्यालयस्य संस्कृतविभागस्य सांख्यदर्शनशाखायां स्नातकोत्तर-परीक्षायां सः प्रथमश्रेण्यां प्रथमस्थानमधिगतवान्।

अध्यापनक्षेत्रेऽपि श्रीतारापदभट्टाचार्यस्य महत्त्वपूर्णं योगदानमासीत्। चारुचन्द्र-महाविद्यालये तथा रवीन्द्रभारती-विश्वविद्यालये सः अध्यापनकार्ये नियुक्तः आसीत्। संस्कृतविषयस्य प्रचार-प्रसारार्थं तस्य महत्त्वपूर्णमवदानमनस्वीकार्यमेव। तस्य पाण्डित्यं तथा अध्यापननैपुण्यं च समादृत्य वङ्गीय-सारस्वत-सम्मेलनेन १३७५ वङ्गाब्दे तस्मै 'शास्त्री' इत्युपाधिः प्रदत्तः।

दार्शनिक-गवेषणाक्षेत्रेऽपि तस्य योगदानं उल्लेखनीयम्। 'न्यायदर्शनमते आत्मा' इति शीर्षकेण रचितस्य गवेषणाग्रन्थस्य कृते सः कलिकाता-विश्वविद्यालयात् 'राणी-रामरक्षी-गवेषणा-सुवर्णपदकं' प्राप्तवान्। अयं गवेषणाग्रन्थः तदानीन्तनस्य कलिकाता-संस्कृत-महाविद्यालयाध्यक्षस्य आचार्य-डॉक्टर-गौरीनाथशास्त्रिणः सम्पादनेन प्रकाशितः।

श्रीतारापदभट्टाचार्यस्य साहित्यसाधनायां कथा-साहित्यस्य विशिष्टं स्थानमासीत्। वङ्गभाषया तेन रचिताः बहवः कथाग्रन्थाः तथा अनेकाश्च कथाः विभिन्नासु पत्रिकासु काले काले प्रकाशिताः। संस्कृतभाषया रचितः तस्य कथासमूहः 'संस्कृत-साहित्य-परिषत्'-पत्रिकायामपि प्रकाशितः। एतेन तस्य संस्कृतसाहित्यं प्रति अनुरागः तथा कथासाहित्ये तस्य मौलिकी प्रतिभा स्पष्टतया प्रकाश्यते।

केवलं कथा-साहित्ये एव न, अपि तु प्रबन्धरचनायामपि तस्य योगदानमासीत्। वङ्गभाषया तथा आङ्ग्लभाषया च तेन विरचिताः विविधाः प्रबन्धाः विभिन्नासु पत्रिकासु प्रकाशिताः। तस्य लेखनस्य विषयवैविध्यं तथा भाषाद्वयस्य प्रयोगनैपुण्यं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

विशिष्टमेव।

अनुवादक्षेत्रेऽपि श्रीतारापदभट्टाचार्यस्य योगदानं स्मरणीयम्। 'बुद्धचरितम्', 'कुट्टनीमतम्', 'अनङ्गरागः', 'शुकसप्ततिः', 'वेतालपञ्चविंशतिः' इत्यादीनां संस्कृतग्रन्थानां वङ्गभाषानुवादाः तेन कृताः, एते ग्रन्थाः विभिन्नैः प्रतिष्ठितैः प्रकाशनसंस्थाभिः प्रकाशिताः। प्राचीनसंस्कृतसाहित्यस्य एतेषाम् अनुवादानां माध्यमेन सामान्यपाठकेभ्यः संस्कृतवाङ्मयस्य समृद्धपरम्परायाः परिचयः सुलभतया जातः।

तस्य साहित्यिकप्रतिभायाः परिचायकः 'शाश्वती कथा' इति ग्रन्थोऽपि विशेषतया उल्लेखनीयः। संस्कृतभाषामाश्रित्य रचितानाम् प्राचीनाख्यायिकानां तथा कथानां विषये वङ्गभाषया विरचितमयं ग्रन्थं 'आनन्द पब्लिशर्स प्राइभेट लिमिटेड्' इति प्रकाशनसंस्थया प्रकाशितम्। अनेन ग्रन्थेन प्राचीनसंस्कृतकथासाहित्यस्य विवेचनं वङ्गभाषया पाठकानां पुरतः प्रस्तुतम्।

तद्वत् 'रूपे अरूप' इति नामकः तस्य वङ्गभाषया रचितः प्रबन्धानां विविधविषयाणां च सङ्कलनग्रन्थः। अयं ग्रन्थः 'सत्यानन्द कल्चरल सोसाइटी' इत्याख्यया संस्थया प्रकाशितः। समग्रतया दृष्ट्वा श्रीतारापदभट्टाचार्यस्य व्यक्तित्वं संस्कृतपाण्डित्येन, दार्शनिकगवेषणया, अध्यापनप्रतिभया, कथासाहित्यसाधनया, अनुवादकौशलेन च समन्वितम् आसीत्। अतः सः संस्कृत-वङ्गभाषयोः साहित्यपरम्परयोः मध्ये सेतुरूपेण स्थितः विशिष्टप्रतिभासम्पन्नः साहित्यिकः इति वक्तुं शक्यते।

कथाद्वादश — 'संस्कृत-साहित्य-परिषत्' पत्रिकायां क्रमेण प्रकाशितानां द्वादश कथानां एकत्र संकलनमेव 'कथा द्वादश' इति कथाग्रन्थः। 'कथा द्वादश' ग्रन्थस्य कथानां विषयवस्तु संक्षेपेण आलोच्यते —

१) **गदाधरविवाहकथा** — मातुः स्नेहाधिक्यस्य परिणामरूपेण शैशवादेव गदाधरस्य मूर्खत्ववर्णनमेव अस्याः कथायाः विषयवस्तु। कथायां प्राप्यते — 'सा तं विविधं खादयति। भोजनेन क्रमशो वर्धितो बालको यथा शुक्लपक्षे चन्द्रमाः। बालकः कृष्णवर्णः, माता तं शुक्लं पश्यति। स च पीनः, माता तु 'पुत्रो मे कृश'[2] इति दुःखिता पुनरपि भोजयति। गुरुगृहमागत्यापि तस्य मूर्खत्वस्य नावसानमभवत्। कदापि स शिवसूत्राणां सृष्ट्यर्थं ढक्कामेकां लगुडेन ताडयति, कदापि वा स्वात्मना सह नारायणस्य तुलनां करोति। एवं विवाहकालेऽपि तस्य विविधा मूर्खता प्रकाशिता वर्तते। अन्ते स्वमतानुसारं विवाहशब्दस्य व्युत्पत्तिं दर्शयित्वा वधूं पृष्ठे गृहीत्वा प्रस्थानं करोति।

२) **शैवली** — कुत्सितानां रमणीनां जीवने कीदृशी यन्त्रणा, अवहेला, अग्रहणीयता इत्यादिकञ्च वर्तते तदस्यां कथायां प्रतिपादितम्। काचित् कुत्सिता नारी शैवली इति शैशवादेव पित्रोः भर्त्सनां सहते। एकदा अकस्मादेव तस्याः विवाहः सम्पन्नोऽभवत्। सा पत्युः बहुमता आसीत्। किन्तु शैशवादेव स्वात्मानं कुत्सितरूपेण मत्वा तन्मनसि हीनमन्यता जाता। सा कदापि स्वात्मानं पत्युः उपयुक्ता न मन्यते। एवं कथायाः अन्ते रोगाक्रान्ता सती सा प्राणान् तत्याज।

३) **चौर-नारद-संवादः** — केनचित् चौरेण सह श्रीमतः नारदस्य संलापात्मिका कविकल्पिता कथा वर्तते 'चौर-नारद-संवादः' इति। अत्र चौरस्य शास्त्रज्ञानं सर्वेषां विस्मयमावहति। शास्त्रवचनमुद्धृत्य स चौरः चौर्यस्य कर्मणः समर्थनं करोति। तस्य तर्केण नारदोऽपि विस्मितः भवति। अन्ततः नारदः स्वीकरोति यत् — 'अमृतं चौरभाषितम्'[3] इति।

४) **मैत्रेयी** — कस्यचिदनाथबालकस्य कथा अत्र वर्णिता। स आश्रयप्रार्थी। कस्यचिद्गृहस्य दम्पत्योः अनुग्रहेण स तद्गृहे तिष्ठति। दम्पत्योः कन्यया मालत्या सह तस्य प्रेम्णो सम्पर्कमभवत्। क्रमशः स शिक्षितोऽभवत्। एकदा चिकित्साशास्त्रस्य अध्ययनार्थं स नगरान्तरं गतवान्। इदं सर्वं दम्पत्योः सहायतयैवाभवत्। किन्तु नगरान्तरं गत्वा तस्य मनः परिवर्तितं जातम्। आश्रयदातारं प्रति तस्य मनः खिन्नमभवत्। इतः कुटुम्बगृहगमनकाले दम्पती जलमग्नौ जातौ। मालती कस्यचिद् परिपालकस्य गृहमानीता भवति। तत्र परिपालकस्य कन्यायाः साहाय्येन अनाथेन सह तस्याः मिलनं भवति।

५) **अथ भेजालकथा** — आधुनिकसमाजस्य भेजालसर्वस्वतामवलम्ब्य देवर्षिणा नारदेन सह तच्छिष्याणां संलापात्मिका कथा वर्तते 'अथ भेजालकथा' इति। इयमपि कथा कविकल्पिता वर्तते। भेजालस्य स्वरूपमेवमुक्तमस्यां कथायां नारदेन— 'उत्तमेन सह अधमं द्रव्यं यत् मिश्रीक्रियते। तथा मिश्रितं द्रव्यमपि भेजालमिति कथ्यते'[4] इति। तत्र उदाहरणम् — ब्राह्ममुहूर्तः! ब्राह्ममुहूर्तस्य भेजालत्वे किं कारणमिति पृच्छायां नारदेन उच्यते — 'तत्र आलोकेन सह अन्धकारस्य मेलनं भवति'[5] इति।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

कथायामस्यां नित्यप्रयोजनीयेषु तथा औषधद्रव्येष्वपि भेजालमिश्रणस्य कथा वर्णिता। नराणां नारीमिव तथा नारीणामपि पुरुषमिव परिधानं प्रति कटाक्षं करोति कथाकारः। अन्ते विवाहेऽपि भेजालं दर्शयित्वा कथेयं परिसमाप्ता भवति।

६) **राधा** — श्रीतारापदभट्टाचार्यविरचितस्य 'कथाद्वादश' ग्रन्थस्य षष्ठी कथा वर्तते 'राधा' इति। इयं कथा राधा-माधव-नाम्नोः दम्पत्योः वियोगान्ता प्रेमकथा। इयं कथा बाह्यतः राधा-माधवयोः प्रेमविवाहस्य तथा तदनन्तरं जातस्य वियोगस्य कथा प्रतिभाति, किन्तु अन्ततः अस्यां कथायां प्रेम, मिलन-विरहौ, आत्मना देहसम्बन्धः, जीव-ब्रह्मैक्यविचारः, भाग्येन कर्मणः सम्बन्धः, भूमातत्त्वं च इत्यादीनां गम्भीरदार्शनिकविषयाणां निरूपणं दृश्यते। अतः इयं केवलं प्रणयकथा न, अपि तु दार्शनिकचिन्तनसमन्विता वियोगान्ता प्रेमकथा इति वक्तुं शक्यते।

७) **इयं पृथ्वी** — कस्यचिद्बालस्य गोपालस्य दुःखपूर्णं जीवनमवलम्ब्य कथाकारेण इयं दीर्घकथा विरचिता। जन्मनोऽनन्तरं तस्य माता ममार। कयाचिद् भिक्षुकिण्या पालितः स भवति। साऽपि वर्षद्वयानन्तरं तं त्यजति। प्रतिवेशिनः गृहे परिपालितः स स्वप्रतिभया शिक्षितः भवति। छाया इति कयाचिद्बालिकया तस्य प्रेम्णो सम्पर्कमभवत्। एकदा तस्य पालिका माता तत्सकाशमागत्य आत्मनः अन्तकाले गोपालस्य नैकट्यमैच्छत्। तया सह ग्रामान्तरं स गच्छति। तत्र पालिकायाः मातुः मरणादनन्तरं कस्यचिदगृहे तिष्ठति गोपालः। तत्र तस्यानुसन्धाने आगत्य रोगग्रस्तायाः पूर्वप्रेमिकायाः छायायाः मृत्युर्भवति। कस्यचित् सहकर्मिणः सेवायां मग्नस्य गोपालस्यापि शरीरं रोगाक्रान्तं भवति। अन्ते सोऽपि मरणमालिङ्गति।

८) **मदनेन कृतम्** — हास्यरसोत्तीर्णायां कथायामस्यां पुष्पायै प्रेम्णो प्राप्त्यर्थं मन्त्रमुपदिशति अश्लेषा — 'भो मदन, इहागच्छ इहागच्छ, इह तिष्ठ इह तिष्ठ, इह सन्निधेहि, इह सन्निरुध्यस्व, अत्राधिष्ठानं कुरु, मम पूजां गृहाण — इत्युच्चार्य हृदये आवाहनादि पञ्चमुद्राः प्रादर्शयत्।'[6] इति। एवं ब्रह्मचारिवेशधारिणः कस्यचिद्युवकस्य आगमनं पुष्पागृहे भवति। अन्ते तस्य परिचयं ज्ञात्वा पुष्पायाः माता तं ताडयति।

९) **पट्टकाष्ठिका** — हास्यरसस्य आवरणेन मनुष्याणां नैतिकतायाः अवनतिः कथाकारेणात्र चित्रिता। पराणस्य मृत्योः अपेक्षायां तस्य परिजनयोः स्वार्थपूर्णमाचरणमत्र कथाकारेण प्रदर्शितम्। कथाकारः अत्यन्तं स्वाभाविकया विनोदपूर्णया च शैल्या मनुष्याणां स्वार्थपरता, नैतिकमूल्यानां ह्रासः, पारिवारिकसम्बन्धेषु संवेदनाहीनता तथा मृत्योरपि स्वार्थसाधनाय उपयोगः इत्येतादृशान् विषयान् चित्रितवान्। अतः कथा केवलं हास्यात्मिका न, अपि तु हास्यस्य माध्यमेन मानवीयस्वभावस्य व्यङ्ग्यात्मकं विश्लेषणमपि करोति।

१०) **जीवनतृष्णा** — इयमस्ति पञ्चजनसम्बद्धा एका प्रेमकथा। यत्र पल्लवः कुमारश्च सायन्तनीं प्रति आसक्तौ। सायन्तनी रजनीशं प्रति अनुरक्ता, तथा मानसी पल्लवञ्च इच्छति। अन्ते कुमारः आत्मनः सर्वं स्थावरमस्थावरं च सायन्तनी रजनीशयोः नाम्नि विलिख्य मरणं वरयति।

११) **तस्मै नमश्चौराय** — हास्यरसस्य आवरणेन चौर्यस्य माहात्म्यकथनमत्र वर्णितम्। दम्पत्योः गृहे लण्ड-गण्डौ इति चौरौ प्रविशतः। तदा आगच्छति गृहस्थायाः भामिन्याः भ्राता। सोऽपि कश्चिच्चौरः। तस्य साहाय्येनैव मुक्तौ भवतः चौरौ। गृहस्थस्य सर्वस्वमपि हृतं भवति। अन्ते तेन चौरेण चौर्यस्य कर्मणः माहात्म्यमपि कथ्यते — 'यः स्वयमन्यायं कृत्वा परस्य पुण्यं जनयति तस्मै नमश्चौराय।'[7] इति।

१२) **विषमप्यमृतम्** — प्रलम्ब-मन्दाकिन्योः दाम्पत्यजीवनस्य विचित्रं स्वरूपमत्र प्रतिपादितम्। प्रहारप्रियः प्रलम्बः मन्दाकिनीं सदा प्रहरति। तत्तु मन्दाकिन्यै रौचते एव। घटनाक्रमेण कस्यचित् पण्डितस्य निर्देशेन मन्दाकिनीं न प्रहरति प्रलम्बः। तेन असन्तुष्टा सा भवति। कथायाः अन्ते तस्य पण्डितस्य निर्देशेनैव तां पुनः प्रहरति प्रलम्बः। अत्रैव समाप्यते विचित्रेयं कथा।

निष्कर्षाः — 'कथाद्वादश' इति कथासङ्ग्रहस्य समग्राध्ययनात् निम्नलिखिताः निष्कर्षाः निष्पद्यन्ते —

प्रथमतः — हास्यं व्यङ्ग्यं च इत्येतौ कथाकारस्य प्रमुखौ अभिव्यक्तिमार्गौ — श्रीतारापदभट्टाचार्यस्य 'कथाद्वादश' इति कथाग्रन्थस्य समग्रावलोकनेन ज्ञायते यत् हास्यं व्यङ्ग्यं च इत्येतौ कथाकारस्य प्रमुखौ अभिव्यक्तिमार्गौ स्तः। कथासु हास्यरसस्य प्रयोजनं न केवलं पाठकानां मनोरञ्जनसाधनम्, अपि तु हास्यस्य माध्यमेन समाजजीवनस्य विविधविषमताः, मानवीयदुर्बलताः,

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

नैतिकमूल्यानां ह्रासः, अन्धानुकरणम्, स्वार्थपरता, मिथ्याभिमानः इत्यादयश्च सूक्ष्मतया प्रकाशिताः दृश्यन्ते। अतः तस्य कथासु हास्यं केवलं विनोदजनकं नास्ति, प्रत्युत तस्य अन्तर्भागे गम्भीरः सामाजिकः सन्देशः निहितः दृश्यते।

'गदाधरविवाहकथा' इति कथायां हास्यस्य माध्यमेन अन्धानुरागः, पुत्रस्य अनुचितप्रशंसा, मिथ्यापाण्डित्याभिमानः तथा शास्त्रवचनानां स्वार्थानुकूलव्याख्या इत्यादयः दोषाः उपहासपूर्वकं प्रदर्शिताः सन्ति। गदाधरस्य पाण्डित्याभिमानः तथा तस्य व्यवहारगतं मूर्खत्वं च इत्यनयोः प्रभावेन पाठकस्य हृदये हास्यरसस्य उत्पत्तिर्भवति, किन्तु तस्य हास्यस्य पृष्ठतः सामाजिकशिक्षा निहिता वर्तते। अनेन कथाकारः सूचयति यत् केवलं शास्त्रज्ञानस्य प्रदर्शनं न पर्याप्तम्; तस्य यथार्थज्ञानमपि आवश्यकम्। शास्त्रज्ञानस्य व्यवहारिकजीवने प्रयोगः अपि अपेक्षितः।

'चौर-नारद-संवादः' इत्यत्र संवादात्मकहास्यस्य माध्यमेन शास्त्रज्ञानस्य स्वार्थपूर्णप्रयोगः, शास्त्रवचनानां संदर्भविहीना व्याख्या तथा पाण्डित्यस्य दुरुपयोगश्च इत्यादयः प्रकाशिताः सन्ति। चौरस्य निर्भीकता, तस्य तर्कशक्तिः, वाग्वैदग्ध्यं तथा शास्त्रवचनानां विचित्रव्याख्या च इत्यादयः पाठके हास्यं जनयन्ति। परन्तु एतदेव हास्यं गम्भीरतरं प्रश्नमुत्थापयति — किं केवलं शास्त्रज्ञानं मनुष्यस्य नैतिकतां निश्चितां करोति? केवलं स्वार्थसिद्धये येषां शास्त्रवचनैः प्रयोजनं, तेषां प्रवृत्तिरेवात्र कथाकारेण वर्णिता।

'अथ भेजालकथा' इत्यत्र हास्यव्यङ्ग्ययोः माध्यमेन समाजे प्रचलितस्य अपमिश्रणस्य स्वरूपं कथाकारेण प्रकाशितम्। 'भेजालम्' केवलं वस्तुनाम् अशुद्धमिश्रणं न, अपि तु सामाजिकजीवने प्रविष्टस्य कृत्रिमतायाः, स्वार्थपरतायाः, नैतिकपतनस्य च प्रतीकरूपेण उपस्थापितम्। विशेषतः औषधादिषु मिश्रणस्य अभियोगः गम्भीरः अस्ति, यतः तस्य प्रत्यक्षः प्रभावः मानवजीवने भवति। कथाकारः विषयस्य गाम्भीर्यं प्रत्यक्षोपदेशेन न, किन्तु हास्यव्यङ्ग्यपूर्णया कथनशैल्या प्रकाशयति। फलतः पाठकः एकस्मिन् एव समये हसति, चिन्तयति च।

'पट्टकाष्ठिका' इति हास्यस्य अधिकतीक्ष्णं सामाजिकव्यङ्ग्यरूपं प्रकाशयति। मनुष्यसम्बन्धेषु प्रविष्टा स्वार्थपरता, संवेदनहीनता, पारिवारिकमूल्यानां ह्रासः तथा मृत्योरपि स्वार्थसाधनाय उपयोगश्च इत्यादयः कथाकारस्य व्यङ्ग्यस्य केन्द्रे भवन्ति। अन्त्येष्टिसंस्कारसम्बद्धं 'पट्टकाष्ठिकायाः' प्रतीकं मानवीयजीवनस्य विडम्बनां प्रकाशयति। हास्यरसस्य माध्यमेन कथाकारः पाठकस्य सम्मुखे समाजस्य कठोरं यथार्थं रूपं स्थापयति।

'तस्मै नमश्चौराय' इति कथा हास्यव्यङ्ग्यप्रधानतायाः उत्कृष्टमुदाहरणं वर्तते। चौर्यकर्मणः समर्थनं कर्तुं चौरस्य तर्कः, तस्य वाग्वैदग्ध्यं तथा नैतिकमूल्यानां विपर्यासः च इत्येताः पाठके हास्यं जनयन्ति। यत्र दोषपूर्णकर्म अपि चातुर्यपूर्णतर्कैः समर्थयितुं शक्यते, तत्र नैतिकमूल्यानां वास्तविकस्थितिरेव प्रश्नांकिता भवति। अतः अत्र हास्यं वस्तुतः सामाजिकव्यङ्ग्यस्य साधनं भवति।

'विषमप्यमृतम्' इत्यस्यां कथायामपि हास्यस्य पृष्ठभूमौ मानवीयस्वभावस्य विचित्रता तथा सामाजिकव्यवहारस्य असङ्गतयश्च प्रकाशिताः। पात्रस्य असामान्यप्रवृत्तयः हास्यं जनयन्ति; परन्तु तासामेव माध्यमेन कथाकारः मानवीयव्यवहारस्य अप्रत्याशितरूपाणि तथा सामाजिकजीवनस्य हास्यास्पदविरोधाभासांश्च उद्घाटयति।

एवं कथाकारस्य हास्यं केवलं विनोदनप्रधानं न, अपि तु 'हास्यस्य माध्यमेन चिन्तनम्' इति स्वरूपात्मकम्। पाठकः प्रथमदृष्ट्या हास्येन आकृष्यते, ततः शनैः शनैः कथायाः अन्तर्निहितं सामाजिकं यथार्थं अनुभवति। बाह्यतः हास्यं, अन्ततः गम्भीरचिन्तनम् — एषा तस्य कथानां प्रमुखा विशेषता अस्ति।

तस्य व्यङ्ग्यस्य लक्ष्यं केवलं व्यक्तिविशेषः नास्ति; अपि तु व्यक्तिमाध्यमेन सामाजिकव्यवस्थायाः दोषाः, नैतिकमूल्यानां अवनतिः तथा मानवीयदुर्बलताश्च कथाकारेण चित्रिताः। अतः हास्यं तस्य कथासु मनोरञ्जनस्य साधनं, व्यङ्ग्यं तु सामाजिकचेतनायाः साधनम् इति वक्तुं शक्यते। उभयोः समन्वयेन कथाकारः पाठकं हसयित्वा तमेव आत्मनिरीक्षणाय प्रेरयति।

द्वितीयतः — मानवीयमनोविज्ञानस्य सूक्ष्मचित्रणम् — 'कथाद्वादश' इति कथासङ्ग्रहस्य कथासु मानवीयमनोविज्ञानस्य सूक्ष्मं यथार्थं च चित्रणम् उपलभ्यते। कथाकारः केवलं पात्राणां व्यवहारान् न वर्णयति, अपि तु तेषां अन्तर्मनसि विद्यमानानां विविधभावानां, मनोविकाराणां, इच्छानां, आकाङ्क्षाणां, द्वन्द्वानां च सूक्ष्मतया निरूपणं करोति। विशेषतः हीनभावना, प्रेम, ईर्ष्या,

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

स्वार्थः, अहङ्कारः, त्यागः, करुणा इत्यादयः मानवीयमनसः विविधाः पक्षाः कथासु विभिन्नैः पात्रैः प्रकाशिताः भवन्ति।

'शैवली' इति कथायां हीनभावनायाः तथा बाह्यरूपाधारितसामाजिकदृष्टेः मनोवैज्ञानिकः प्रभावः विशेषतया प्रकाश्यते। बाह्यसौन्दर्यस्य आधारेण जनस्य मूल्यायणं, सामाजिकी उपेक्षा तथा आत्मन्यूनताबोधश्च इत्येतेषां कारणेन पात्रस्य मनसि गम्भीरं दुःखम् उत्पद्यते। एवं कथाकारः दर्शयति यत् निरन्तरम् उपेक्षितः मनुष्यः शनैः शनैः आत्मविश्वासं त्यक्त्वा हीनभावनया पीडितो भवितुमर्हति। अत्र बाह्यावस्थानां प्रभावः पात्रस्य अन्तर्मनसि कथं जायते इति सूक्ष्मतया चित्रितः अस्ति।

'राधा' इति कथायां प्रेम, विरहः, दाम्पत्यनिष्ठा तथा त्यागभावना इत्यादीनां मनोवैज्ञानिकपक्षाः प्रमुखतया दृश्यन्ते। राधा-माधवयोः सम्बन्धे प्रेम केवलं लौकिकाकर्षणरूपेण न चित्रितम्, अपि तु तत्र परस्परनिष्ठा, आत्मसमर्पणम्, वियोगजन्यवेदना तथा प्रियजनस्य हितकामना च अन्तर्भवन्ति। प्रेम्णः महत्तरं रूपं अत्र राधा-माधवयोः कथोपकथनेन प्रकाशितम्।

'इयं पृथ्वी' इत्यस्यां कथायां मानवीयजीवनस्य सुखदुःखयोः समन्वयः, मातृत्वभावना, सेवा, त्यागः तथा मानवीयसम्बन्धानां गभीरता च चित्रिताः सन्ति। पात्राणां जीवने सुखदुःखयोः परस्परसम्बन्धः तथा विपरीतावस्थास्वपि मानवीयसंवेदनायाः स्थैर्यं इति विषयद्वयं प्रकाशितं वर्तते। अत्र कथाकारः सूचयति यत् मनुष्यस्य वास्तविकं मूल्यं केवलं तस्य बाह्यावस्थां दृष्ट्वा न विचारणीयम्, अपि तु तस्य कर्मणा, प्रेम्णा, सेवाभावेन च निर्धारितं भवति।

'जीवनतृष्णा' इति कथायां प्रेम्णो मनोवैज्ञानिकं रूपं विशेषतया विकसितं दृश्यते। विभिन्नपात्राणां परस्परसम्बन्धेषु प्रेम, त्यागः, आकाङ्क्षा, विरहः तथा प्रियजनस्य सुखकामना इत्यादयः भावाः परस्परं सम्बध्यन्ते। विशेषतः कुमारस्य मानसे स्वकीयसुखापेक्षया सायन्तन्याः सुखं प्रति अधिका चिन्ता दृश्यते। एषः भावः प्रेम्णः त्यागमयस्वरूपं प्रकाशयति। अत्र प्रेम केवलं प्राप्तेः आकाङ्क्षा न भवति, अपि तु प्रियजनस्य सुखे स्वस्य सुखस्य अनुभवः इति उच्चतरं मनोवैज्ञानिकं स्वरूपं प्राप्नोति।

'पट्टकाष्ठिका' तथा 'तस्मै नमश्चौराय' इत्येतासु कथासु मानवीयमनोविज्ञानस्य अन्यः पक्षः — स्वार्थपरता, नैतिकमूल्यानां विपर्यासः तथा आत्मकेन्द्रिकता च प्रकाशिताः। स्वार्थसिद्धये मनुष्यः कथं सम्बन्धानामपि उपेक्षां करोति, कथं स्वकीयस्य कर्मणः समर्थनाय तर्कान् कल्पयति, कथं नैतिकतायाः सीमा स्वार्थानुसारं परिवर्तते - इत्यादयः मनोवैज्ञानिकाः पक्षाः हास्यव्यङ्ग्ययोः माध्यमेन उद्घाटिताः सन्ति।

एवं 'कथाद्वादश' इत्यस्य कथासङ्ग्रहस्य पात्राणि एकरूपाणि न सन्ति। तेषां मनसि प्रेम्णः कोमलता, ईर्ष्यायाः तीव्रता, स्वार्थस्य कठोरता, अहङ्कारस्य अन्धता, त्यागस्य उदारता, करुणायाः मानवीयता इत्यादयश्च विभिन्नरूपेण दृश्यन्ते। कथाकारः पात्राणां मनोभावानां चित्रणं केवलं घटनानां माध्यमेन न करोति, अपि तु तेषाम् अन्तर्मनसः स्वरूपं प्रकाशयति।

तृतीयतः — प्रेम्णो मानवतायाश्च जीवनाधाररूपेण प्रतिष्ठापनम् — 'कथाद्वादश' इति कथासङ्ग्रहस्य समग्राध्ययनेन ज्ञायते यत् प्रेम तथा मानवता अनेकासु कथासु जीवनस्य आधाररूपेण प्रतिष्ठितौ स्तः। कथाकारस्य दृष्ट्या प्रेम केवलं स्त्रीपुरुषयोः परस्परसम्बन्धपर्यन्तं सीमितं नास्ति, अपि तु त्यागस्य, समर्पणस्य, सहानुभूतेः, करुणायाः तथा परहितचिन्तनस्य व्यापकं मानवीयं रूपम् अपि वहति। एवं मानवता न केवलम् आदर्शरूपेण प्रकाशिता, किन्तु विविधपात्राणाम् आचरणेषु, सम्बन्धेषु तथा जीवननिर्णयेषु सा मूर्तरूपेण अभिव्यज्यते।

'राधा' इत्यस्यां कथायां प्रेम्णः पवित्रं तथा त्यागमयं स्वरूपं विशेषतया प्रकाश्यते। राधा-माधवयोः सम्बन्धे प्रेम केवलं व्यक्तिगतसुखस्य साधनं न भवति, अपि तु विश्वासस्य, निष्ठायाः तथा आत्मसमर्पणस्य आधाररूपेण प्रतिष्ठितं भवति। प्रेम्णः वास्तविकं मूल्यं तदा प्रकाश्यते, यदा प्रियजनस्य सुखाय मनुष्यः स्वकीयसुखं त्यजति। अतः अस्यां कथायां प्रेम मानवीयजीवनस्य गभीरतमासु भावनासु अन्यतमरूपेण चित्रितम् अस्ति।

'जीवनतृष्णा' इत्यस्यां कथायां प्रेम्णः त्यागमयं तथा परहितप्रधानं स्वरूपम् दृश्यते। कथायाः पात्रेषु प्रेम न केवलं स्वार्थपरतायाः साधनम्, अपि तु प्रियजनस्य सुखं स्वसुखात् अधिकं महत्त्वपूर्णं मन्यते। विशेषतः कुमारस्य चरित्रे एषा भावना स्पष्टतया दृश्यते। सः स्वकीयजीवनस्य अपेक्षया सायन्तन्याः सुखं तथा तस्याः मङ्गलं महत्त्वपूर्णं मन्यते। पल्लवस्य चरितमपि तादृशमेव निर्मितं कथाकारेण।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

कथासु प्रेम्ण एकं महत्त्वपूर्णं रूपं मानवीयसम्बन्धानां संरक्षणम् अपि अस्ति। प्रेम मनुष्येषु परस्परं विश्वासं, सहानुभूतिं तथा आत्मीयतां जनयति। यत्र स्वार्थः, अहङ्कारः, ईर्ष्या वा सम्बन्धानां विघटनस्य कारणं भवति, तत्र प्रेम तेषां सम्बन्धानां पुनर्निर्माणस्य कारणं भवति।

मानवतायाः स्वरूपमपि कथासु विविधप्रसङ्गैः प्रकाशितम् अस्ति। 'मैत्रेयी' इत्यस्यां कथायाम् अनाथबालकं प्रति प्रदर्शिता करुणा, स्नेहः तथा शिक्षाप्रदानञ्च इत्यादयः चित्रिताः सन्ति। तस्य जीवनस्य प्रतिष्ठार्थं कृतः प्रयत्नः मानवतायाः महत्त्वपूर्णम् उदाहरणं भवति। अत्र मनुष्यस्य यथार्थं मूल्यं तस्य सामाजिकवस्थायां निहितं न भवति; अपि तु तस्य अन्तर्निहितप्रतिभायाः विकासे तथा तं प्रति प्रदर्शितायां मानवीयकरुणायां निहितम् अस्ति। एतादृशेन चित्रणेन कथाकारः समाजे उपेक्षितानां तथा दुर्बलानां प्रति सहानुभूतिप्रदर्शनस्य आवश्यकतां प्रतिपादयति।

'इयं पृथ्वी' इत्यस्यां कथायामपि मानवतायाः व्यापकं स्वरूपं दृश्यते। अत्र जीवनस्य सुखदुःखयोः सह-अस्तित्वं, जन्ममरणयोः अनिवार्यता, मातृत्वम्, सेवा, त्यागः तथा कर्मणः महत्त्वमित्यादिकञ्च विविधप्रसङ्गैः प्रतिपादितम् अस्ति। मनुष्यस्य जीवनस्य सार्थकता केवलं व्यक्तिगतसुखप्राप्तौ न, अपि तु अन्यान् प्रति कृतायां सेवायां, प्रेम्णि तथा त्यागे निहिता भवति। अनेन कथाकारः मानवजीवनस्य मूल्यं सामाजिकप्रतिष्ठया न, अपि तु कर्मणा, प्रेम्णा तथा सेवाभावेन निर्धारितं भवतीति प्रतिपादयति।

अत्र प्रेम तथा मानवता इत्येतौ परस्परसम्बद्धौ अपि स्तः। प्रेम मानवतायाः भावात्मकं स्वरूपं, मानवता च प्रेम्णः व्यापकतरं सामाजिकरूपमिति। अतः कथाकारस्य साहित्ये प्रेम्णः परिणतं रूपं त्यागे, सेवायां तथा परहितभावनायाञ्च दृश्यते।

चतुर्थतः —परम्परायाः आधुनिकतायाश्च समन्वयः— 'कथाद्वादश' इति कथासङ्ग्रहस्य एकं महत्त्वपूर्णं वैशिष्ट्यं परम्परायाः आधुनिकतायाश्च सम्मेलनम् अस्ति। कथाकारस्य शास्त्रज्ञत्वे नास्ति संशयस्यावकाशः। संस्कृतसाहित्यस्य प्राचीनपरम्परायाः, पौराणिककथानां, शास्त्रीयविचाराणां तथा पारम्परिकतत्त्वानां गभीरं ज्ञानं कथाकारस्य अस्तीति कथानामालोचनेन ज्ञायते। तथापि स स्वस्य कथावस्तु केवलं प्राचीनविषयेषु सीमितं न करोति। अपि तु सः एतान् पारम्परिकतत्त्वान् आधुनिकजीवनस्य विविधैः सामाजिकैः, नैतिकैः तथा मानवीयैः विषयैः सह संयोजयति। अतः कथासु एकतः परम्परायाः स्मरणं भवति, अपरतः आधुनिकसमाजस्य वास्तविकतायाः चित्रणमपि दृश्यते। अनेन प्राचीनसाहित्यपरम्परा वर्तमानजीवनस्य अनुभवैः सह सम्बद्धा भवति तथा तस्याः प्रासङ्गिकतापि नूतनरूपेण प्रकाशिता अस्ति।

'गदाधरविवाहकथा' इत्यस्यां परम्परागतशास्त्रीयज्ञानस्य आधुनिकव्यवहारेण सह सम्बन्धः हास्यव्यङ्ग्ययोः माध्यमेन प्रस्तुतः अस्ति। गदाधरस्य पाण्डित्याभिमानः तथा शास्त्रवचनानां अयथार्थग्रहणं दर्शयित्वा केवलं शास्त्रज्ञानस्य धारणं पर्याप्तं न भवति इत्यपि दर्शयति। तस्य यथार्थबोधः तथा व्यवहारिकप्रयोगः अपि आवश्यकौ स्तः। 'अल्पविद्या भयंकरी' इति प्रवादस्य यथार्थचित्रणमेव अत्र कथाकारेण प्रदर्शितम्।

'चौरनारदसंवादः' इत्यत्र परम्परा-आधुनिकतयोः समन्वयः विशिष्टतया दृश्यते। नारदः भारतीयपौराणिकपरम्परायाः प्रसिद्धं पात्रम् अस्ति। कथाकारः तं चौरेण सह संवादे स्थापयति। चौरः स्वकीयचौर्यकर्मणः समर्थनाय शास्त्रीयवचनानां तथा धार्मिकधारणानां स्वमतानुसारं व्याख्यानं ददाति। पौराणिकचरितेन सह चौरस्य कथोपकथनस्य धारणा सर्वथा कथाकारस्य आधुनिकमानसिकतायाः परिचायकः। विशेषतः चौरस्य यैः वाक्यैः नारदः विस्मितः भवति — तत्तु पाठकान् आकर्षयति एव।

'तस्मै नमश्चौराय' इत्यस्यां कथायामपि चौर्यस्य कर्मणः समर्थनं चौरस्यैव मुखेन कथाकारः प्रकाशयति। चौर्यस्य कर्मणः समर्थनाय विचित्रतर्काणां प्रयोगः कथाकारस्य अभिनवत्वं सूचयति। वर्तमानसमाजस्य नैतिकतायाः पतनमपि कथायामस्यां चित्रितं वर्तते।

अत्र कथाकारस्य वैशिष्ट्यं तदपि यत् सः परम्परायाः अन्धानुकरणं न करोति, न च आधुनिकतायाः नाम्ना तां पूर्णतया परित्यजति। सः उभयोः मध्ये सम्बन्धं स्थापयति। यत्र परम्परायाः कठिनं रूपं समाजे अव्यवस्थां जनयति, तत्र कथाकारः हास्यव्यङ्ग्ययोः माध्यमेन तदालोचयति। यत्र परम्परागतमूल्यं मानवीयजीवनस्य हितसाधकं भवति, तत्र तस्य महत्त्वं प्रतिष्ठापयति। अनेन तस्य दृष्टिः विवेकप्रधानेति ज्ञायते।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

समग्रतः 'कथाद्वादश' इति कथासङ्ग्रहे परम्परा तथा आधुनिकता च इत्येतौ परस्परविरोधिन्यौ न भवतः। पौराणिकपात्राणां, शास्त्रीयविचाराणां तथा पारम्परिकमूल्यानां आधुनिकजीवनस्य सामाजिक-मनोवैज्ञानिकावस्थाभिः सह संयोजनं कथाकारस्य सर्जनात्मकप्रतिभां प्रकाशयति।

पञ्चमतः, भाषाशैल्याः सहजता तथा संवादप्रधानता— 'कथाद्वादश' इति कथासङ्ग्रहस्य एकं उल्लेखनीयं वैशिष्ट्यं भाषाशैल्याः सहजता तथा संवादप्रधानता इति। कथाकारः कथावस्तुनः अनुरूपां सरलां, स्वाभाविकीं तथा प्रसङ्गानुकूलां भाषां प्रयुङ्क्ते। तस्य भाषाप्रयोगे अनावश्यककठिनता न दृश्यते; अपि तु कथायाः, पात्राणां तथा घटनानां स्वभावानुसारं भाषा स्वाभाविकतया प्रवहति। अनेन कथाः पाठकानां कृते सुबोधाः तथा आकर्षकाः भवन्ति।

कथाकारस्य भाषायाः सहजता विशेषतः पात्राणां संवादेषु स्पष्टतया दृश्यते। पात्राणि स्वकीयस्वभावानुरूपं भाषन्ते तथा तेषां कथोपकथनेन तेषां मानसिकता, विचारधारा, संस्कारः तथा सामाजिकस्थितिश्च सहजतया प्रकाशिताः वर्तन्ते। संवादाः केवलं कथायाः वृत्तान्तं न सूचयन्ति, अपि तु पात्राणां व्यक्तित्वनिर्माणे महत्त्वपूर्णाः सन्ति। अनेन संवादाः कथासु कृत्रिमतां दूरीकृत्य सजीवतां जनयन्ति।

'गदाधरविवाहकथा' इत्यस्यां गदाधरस्य कथोपकथनस्य माध्यमेन तस्य पाण्डित्याभिमानः यथा प्रकाशितः तथैव शास्त्रवचनानाम् अयथार्थग्रहणवृत्तिरपि कथाकारेण प्रकाशिता इति।

'चौरनारदसंवादः' इत्यस्यां संवादप्रधानता विशेषतया उल्लेखनीया अस्ति। नारदस्य तथा चौरस्य मध्ये यः संवादः भवति, सः सम्पूर्णकथायाः प्रमुखमाध्यमरूपेण कार्यं करोति।

'मदनेन कृतम्' इत्यस्यां कथायामपि संवादानां सजीवता विशेषतया दृश्यते। अस्यां कथायां संवादाः कथायाः हास्यरसस्य विकासे गुरुत्वपूर्णाः सन्ति।

संवादप्रधानतायाः अन्यदपि महत्त्वं यत् तया कथाकारस्य प्रत्यक्षोपदेशः पात्राणां कथोपकथनेन प्रकाशितः भवति। न तु कथाकारः स्वयमेव तान् प्रकाशयति।

समग्रतः 'कथाद्वादश' इति कथासङ्ग्रहे भाषायाः सहजता तथा संवादानां सजीवता च इत्येतौ कथाकारस्य कथनकौशलस्य महत्त्वपूर्णौ पक्षौ स्तः।

षष्ठतः, वङ्गीयतायाः प्रकाशः – तारापदभट्टाचार्यस्य कथासु तस्य वङ्गीयत्वं बहुधा प्रकाशितं वर्तते। कदापि सः कथयति 'वङ्गे तु कन्यैवेदं सर्वम् [8]'इति। कदापि वा 'दग्धललाट', 'दग्धमुखि!' 'ठक्कुरपुत्र!' इत्यादयः शब्दाः कथाकारेण प्रयुज्यन्ते। कुत्रापि च 'शाकेन मत्स्यं छादयति'[9] 'भिन्नक्षते लवणप्रक्षेपः'[10] इति वङ्गीयप्रवादाः कथासु प्राप्यन्ते। 'निमकि, सिङ्गारा तस्याः प्रिया इति द्वे एव समाहरत्'[11] इत्यस्मिन् वाक्ये प्रसिद्धवङ्गीयभोजनानि कथाकारेण उल्लिखितानि। पुनः 'विड़ि' 'पोच' 'महिला' 'चा' इत्यादयः शब्दाः कथाकारेण उल्लिखिताः दृश्यन्ते। वङ्गदेशस्य शब्दानां संस्कृतेश्च प्रभावः कथाकारस्य कथासु उल्लेखनीय एव। एवं वङ्गीयस्य कथाकारस्य कथासु वङ्गीयत्वं परिलक्ष्यते एव।

Endnotes

1. आधुनिक संस्कृत साहित्य, पृष्ठाङ्कः २५
2. कथा द्वादशे, पृष्ठांकः १
3. कथा द्वादशे, पृष्ठांकः २५
4. कथा द्वादशे, पृष्ठांकः ४७
5. तत्रैव
6. कथा द्वादशे, पृष्ठाङ्कः १०८
7. कथा द्वादशे, पृष्ठाङ्कः १८७
8. कथा द्वादशे, पृष्ठाङ्कः ५

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

9. कथा द्वादशे, पृष्ठाङ्कः १९३
10. कथा द्वादशे, पृष्ठाङ्कः २०४
11. कथा द्वादशे, पृष्ठाङ्कः १९६

Bibliography

- Bhattacharya, Tarapada. *Kathā Dvādaśa.* 1st ed., Sanskrit Sahitya Parishat, 2004
- Chattopadhyay, Rita. *Ādhunika Saṁskṛta Kathāsāhitya*. Progressive Publishers, Reprint Apr. 2009.
- Das, Santigopal. *Ādhunika Saṁskṛta Kathāsāhitya*. 1st ed., Sanskrit Pustak Bhandar, Aug. 2019.
- Kulshrestha, Ruchi. *Bīsavīṁ Śatābdī Kā Saṁskṛta Laghukathā-Sāhitya*. 1st ed., Parimal Publications, 2008.
- Sen, Subhrajit. *Modern Sanskrit Literature in India : A Bird's Eye View*. 1st ed., Sanskrit Pustak Bhandar, Jan. 2019

———